# Krishnastotra by Indra

# શ્રીકૃષ્ણસ્તોત્રં ઇન્દ્રરચિતમ્

## Document Information

Text title : indra rachita kRiShNastotra

File name : indrakrishnastotra.itx

Category : vishhnu, krishna, stotra, vyAsa, vishnu

Location : doc_vishhnu

Author : Indra

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : brahmavaivarta

Latest update : January 19, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીકૃષ્ણસ્તોત્રં ઇન્દ્રરચિતમ્

શ્રીગણેશાય નમઃ ।

ઇન્દ્ર ઉવાચ ।

અક્ષરં પરમં બ્રહ્મ જ્યોતીરૂપં સનાતનમ્ ।
ગુણાતીતં નિરાકારં સ્વેચ્છામયમનન્તજમ્ ॥ ૧॥

ભક્તધ્યાનાય સેવાયૈ નાનારૂપધરં વરમ્ ।
શુક્લરક્તપીતશ્યામં યુગાનુક્રમણેન ચ ॥ ૨॥

શુક્લતેજઃસ્વરૂપં ચ સત્યે સત્યસ્વરૂપિણમ્ ।
ત્રેતાયાં કુઙ્કુમાકારં જ્વલન્તં બ્રહ્મતેજસા ॥ ૩॥

દ્વાપરે પીતવર્ણં ચ શોભિતં પીતવાસસા ।
કૃષ્ણવર્ણં કલૌ કૃષ્ણં પરિપૂર્ણતમં પ્રભુમ્ ॥ ૪॥

નવધારાધરોત્કૃષ્ટશ્યામસુન્દરવિગ્રહમ્ ।
નન્દૈકનન્દનં વન્દે યશોદાનન્દનં પ્રભુમ્ ॥ ૫॥

ગોપિકાચેતનહરં રાધાપ્રાણાધિકં પરમ્ ।
વિનોદમુરલીશબ્દં કુર્વન્તં કૌતુકેન ચ ॥ ૬॥

રૂપેણાપ્રતિમેનૈવ રત્નભૂષણભૂષિતમ્ ।
કન્દર્પકોટિસૌન્દર્યં વિભ્રતં શાન્તમીશ્વરમ્ ॥ ૭॥

ક્રીડન્તં રાધયા સાર્ધં વૃન્દારણ્યે ચ કુત્રચિત્ ।
કુત્રચિન્નિર્જનેઽરણ્યે રાધાવક્ષઃસ્થલસ્થિતમ્ ॥ ૮॥

જલક્રીડાં પ્રકુર્વન્તં રાધયા સહ કુત્રચિત્ ।
રાધિકાકબરીભારં કુર્વન્તં કુત્રચિદ્વને ॥ ૯॥

કુત્રચિદ્રાધિકાપાદે દત્તવન્તમલક્તકમ્ ।
રાધાર્ચવિતતામ્બૂલં ગૃહ્ણન્તં કુત્રચિન્મુદા ॥ ૧૦॥

પશ્યન્તં કુત્રચિદ્રાધાં પશ્યન્તીં વક્રચક્ષુષા ।
દત્તવન્તં ચ રાધાયૈ કૃત્વા માલાં ચ કુત્રચિત્ ॥ ૧૧॥

કુત્રચિદ્રાધયા સાર્ધં ગચ્છન્તં રાસમણ્ડલમ્ ।
રાધાદત્તાં ગલે માલાં ધૃતવન્તં ચ કુત્રચિત્ ॥ ૧૨॥

સાર્ધં ગોપાલિકાભિશ્ચ વિહરન્તં ચ કુત્રચિત્ ।
રાધાં ગૃહીત્વા ગચ્છન્તં તાં વિહાય ચ કુત્રચિત્ ॥ ૧૩॥

વિપ્રપત્નીદત્તમન્નં ભુક્તવન્તં ચ કુત્રચિત્ ।
ભુક્તવન્તં તાલફલં બાલકૈઃ સહ કુત્રચિત્ ॥ ૧૪॥

વસ્ત્રં ગોપાલિકાનાં ચ હરન્તં કુત્રચિન્મુદા ।
ગવાં ગણં વ્યાહરન્તં કુત્રચિદ્બાલકૈઃ સહ ॥ ૧૫॥

કાલીયમૂર્ધ્નિ પાદાબ્જં દત્તવન્તં ચ કુત્રચિત્ ।
વિનોદમુરલીશબ્દં કુર્વન્તં કુત્રચિન્મુદા ॥ ૧૬॥

ગાયન્તં રમ્યસઙ્ગીતં કુત્રચિદ્બાલકૈઃ સહ ।
સ્તુત્વા શક્રઃ સ્તવેન્દ્રેણ પ્રણનામ હરિં ભિયા ॥ ૧૭॥

પુરા દત્તેન ગુરુણા રણે વૃત્રાસુરેણ ચ ।
કૃષ્ણેન દત્તં કૃપયા બ્રહ્મણે ચ તપસ્યતે ॥ ૧૮॥

એકાદશાક્ષરો મન્ત્રઃ કવચં સર્વલક્ષણમ્ ।
દત્તમેતત્કુમારાય પુષ્કરે બ્રહ્મણા પુરા ॥ ૧૯॥

તેન ચાઙ્ગિરસે દત્તં ગુરવેઽઙ્ગિરસા મુને ।
ઇદમિન્દ્રકૃતં સ્તોત્રં નિત્યં ભક્ત્યા ચ યઃ પઠેત્ ॥ ૨૦॥

ઇહ પ્રાપ્ય દૃઢાં ભક્તિમન્તે દાસ્યં લભેદ્ધ્રુવમ્ ।
જન્મમૃત્યુજરાવ્યાધિશોકેભ્યો મુચ્યતે નરઃ ॥ ૨૧॥

ન હિ પશ્યતિ સ્વપ્નેઽપિ યમદૂતં યમાલયમ્ ॥ ૨૨॥

॥ ઇતિ શ્રીબ્રહ્મવૈવર્તે ઇન્દ્રકૃતં શ્રીકૃષ્ણસ્તોત્રં સમાપ્તમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*Krishnastotra by Indra*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*